# vishveshalaharI

# વિશ્વેશલહરી

## Document Information

Text title : vishveshalaharI

File name : vishveshalaharI.itx

Category : laharI, shiva

Location : doc_shiva

Author : khaNDarAjadIkShita

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : February 28, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# વિશ્વેશલહરી

શ્રીગણેશાય નમઃ ॥

સિદ્ધિબુદ્ધિપતિં વન્દે શ્રીગણાધીશ્વરં મુદા ।
તસ્ય યો વન્દનં કુર્યાત્ સ ધીનાં યોગમિન્વતિ ॥ ૧॥

વન્દે કાશીપતિં કાશી જાતા યત્કૃપયા પુરી ।
પ્રકાશનાર્થં ભક્તાનાં હોતારં રત્નધાતમમ્ ॥ ૨॥

ભક્તાવનં કરોમીતિ મા ગર્વં વહ શઙ્કર ।
તેભ્યઃ સ્વપૂજાગ્રહણાત્તવેતત્સત્યમઙ્ગિરઃ ॥ ૩॥

મુધા લક્ષ્મીં કામયન્તે ચઞ્ચલાં સકલા જનાઃ ।
કાશીરૂપાં કામયેઽહં લક્ષ્મીમનપગામિનીમ્ ॥ ૪॥

પ્રાપ્નુવન્તુ જના લક્ષ્મીં મદાન્ધનૃપસેવનાત્ ।
લભે વિશ્વેશસેવાતો ગામશ્વં પુરુષાનહમ્ ॥ ૫॥

ન મત્કુટુમ્બરક્ષાર્થમાહૂયામિ શ્રિયં બુધાઃ ।
વિશ્વેશ્વરારાધનાર્થં શ્રિયં દેવીમુપાહ્વયે ॥ ૬॥

આપાતરમણીયેયં શ્રીર્મદાન્ધકરી ચલા ।
અસારસંસૃતૌ કાશીં સા હિ શ્રીરમૃતા સતામ્ ॥ ૭॥

કાશી ગઙ્ગાન્નપૂર્ણા ચ વિશ્વેશાદ્યાશ્ચ દેવતાઃ ।
અવન્તુ બાલમજ્ઞં મામુશતીરિવ માતરઃ ॥ ૮॥

સદૈવ દુઃખકારિણીં ન સંસૃતિં હિ કામયે
    શિવપ્રિયાં સુખપ્રદાં પરાં પુરીં હિ કામયે ।
સ્વભક્તદુઃખહારકં મનોરથપ્રપૂરકં
    શિવં સદા મુદા ભજે મહેરણાય ચક્ષસે ॥ ૯॥

સ્વસેવકસુતાદીનાં પાલનં કુર્વતે નૃપાઃ ।

પાસ્યેવાસ્માંસ્તુ વિશ્વેશ ગીર્વાણઃ પાહિ નઃ સુતાન્ ॥ ૧૦॥

નિષેવ્ય કાશિકાં પુરીં સદાશિવં પ્રપૂજ્ય વૈ
 ગુરોર્મુખારવિન્દતઃ સદાદિરૂપમદ્વયમ્ ।
વિચાર્ય રૂપમાત્મનો નિષેધ્ય નશ્વરં જડં
 ચિદાત્મના તમોભિદં ધનેન હન્મિ વૃશ્ચિકમ્ ॥ ૧૧॥

હે ભાગીરથિ હે કાશિ હે વિશ્વેશ્વર તે સદા ।
કલયામિ સ્તવં શ્રેષ્ઠમેષ રારન્તુ તે હૃદિ ॥ ૧૨॥

વિશ્વનાથ સદા કાશ્યાં દેહ્યસ્મભ્યં ધનં પરમ્ ।
પુરા યુદ્ધેષુ દૈત્યાનાં વિદ્મહે ત્વાં ધનઞ્જયમ્ ॥ ૧૩॥

અવિનાશિ પુરા દત્તં ભક્તેભ્યો દ્રવિણં ત્વયા ।
કાશિવિશ્વેશ ગઙ્ગે ત્વામથ તે સ્તુમ્નમીમહે ॥ ૧૪॥

સંસારદાવવહ્નૌ માં પતિતં દુઃખિતં તવ ।
વિશ્વેશ પાહિ ગઙ્ગાદ્યૈરાગત્ય વૃષભિઃ સુતમ્ ॥ ૧૫॥

કાશીં પ્રતિ વયં યામ દયયા વિશ્વનાથ તે ।
તત્રૈવ વાસં કુર્યામ વૃક્ષે ન વસતિં વયઃ ॥ ૧૬॥

હે સરસ્વતિ હે ગઙ્ગે હે કાલિન્દિ સદા વયમ્ ।
ભજામામૃતરૂપં તં યો વઃ શિવતમો રસઃ ॥ ૧૭॥

વિશ્વનાથેદમેવ ત્વાં યાચામ સતતં વયમ્ ।
સ્થિત્વા કાશ્યામધ્વરે ત્વાં હવિષ્મન્તો જરામહે ॥ ૧૮॥

સર્વાસુ સોમસંસ્થાસુ કાશ્યામિન્દ્રસ્વરૂપિણે ।
હે વિશ્વેશ્વર તે નિત્યં સોમં ચોદામિ પીતયે ॥ ૧૯॥

કાશ્યાં રૌદ્રેષુ ચાન્યેષુ યજામ ત્વાં મખેષુ વૈ ।
હે વિશ્વેશ્વર દેવૈસ્ત્વં રારન્ધિ સવનેષુ નઃ ॥ ૨૦॥

માં મોહાદ્યા દુર્જનાશ્ચ બાધન્તે નિષ્પ્રયોજનમ્ ।
વિશ્વેશ્વર તતો મે ત્વાં વરૂત્રીં ધિષણાં વહ ॥ ૨૧॥

રુદ્રાક્ષભસ્મધારી ત્વાં કાશ્યાં સ્તૌમીશ સંસ્તવૈઃ ।
ત્વત્પાદામ્બુજભૃઙ્ગં માં ન સ્તોતારં નિદેકરઃ ॥ ૨૨॥

વિહાય ચઞ્ચલં વધૂસુતાદિકં હિ દુઃખદં

ત્વદીયકામસંયુતા ભવેમ કાશિકાપુરી ।
સ્વસેવકાર્તિનાશક પ્રકૃષ્ટસંવિદર્પક
ભવૈવ દેવ સન્તતં હ્યુતત્વભસ્મયુર્વસો ॥ ૨૩॥

વિશ્વેશ કાશ્યાં ગઙ્ગાયાં સ્નાત્વા ત્વાં રમ્યવસ્તુભિઃ ।
પૂજયામ વયં ભક્ત્યા કુશિકાસો અવસ્યવઃ ॥ ૨૪॥

વિશ્વેશ નિત્યમસ્મભ્યં ભયમુત્પાદયન્તિ યે ।
તેષાં વિધાયોપમર્દં તતો નો અભયં કૃધિ ॥ ૨૫॥

રાક્ષસાનાં સ્વભાવોઽયં બાધ્યા વિશ્વેશ જીવકાઃ ।
ભક્તાનુકમ્પયા શમ્ભો સર્વં રક્ષો નિબર્હય ॥ ૨૬॥

વિશ્વેશ્વર સદા ભીતઃ સંસારાર્ણવાજ્જનાત્ ।
માં પાલય સદેતિ ત્વાં પુરુહૂતમુપબ્રુવે ॥ ૨૭॥

ઇદં વિમૃશ્ય નશ્વરં જડં સદૈવ દુઃખદં
સમર્ચિતું શિવં ગતાઃ પરાં પુરીં યતો દ્વિજાઃ ।
તતોઽભિગમ્ય તાં પુરીં સમર્ચ્ય વસ્તુભિઃ પરૈઃ
શિવં સ્વભક્તમુક્તિદં તમિત્યખિત્વ ઈમહે ॥ ૨૮॥

કાશ્યાં વયં સદૈવ ત્વાં યજામ સકલૈર્મખૈઃ ।
વિશ્વેશ્વર ત્વં સમસ્તૈર્દેવૈરાસત્સિ બર્હિષિ ॥ ૨૯॥

યક્ષેશ્વરેણ રક્ષિતં શ્રેષ્ઠં ધનમખેષુ તે ।
દેહિ વ્યયામ શઙ્કર હ્યસ્મભ્યમપ્રતિષ્કૃતઃ ॥ ૩૦॥

મત્પૂર્વજા મહાશૈવા ભસ્મરુદ્રાક્ષધારિણઃ ।
વિશ્વેશ્વર સુરેષુ ત્વામદ્ધશમિવ યેમિરે ॥ ૩૧॥

શમ્ભોર્વિધાય યેઽર્ચનં તિષ્ઠન્તિ તત્પરા યદા ।
તાન્ શઙ્કરો ગિરે દ્રુતં યૂથેન વૃષ્ણિરેજતિ ॥ ૩૨॥

ત્વાં પૂજયામીશ સુરં માનસૈર્દિવ્યવસ્તુભિઃ ।
હે વિશ્વેશ્વર દેવૈસ્ત્વં સોમ રારન્ધિ નો હૃદિ ॥ ૩૩॥

પ્રાદુર્ભવસિ સદ્યસ્ત્વં ક્લેશો ભક્તજને યદા ।
તતોઽહં ક્લેશવાન્ કુર્વે સદ્યોજાતાય વૈ નમઃ ॥ ૩૪॥

વામદેવેતિ મનૂ રમ્યતાં યસ્ય સઞ્જગૌ ।

ઈશસ્તસ્માત્ક્રિયતે વમદેવાય તે નમઃ ॥ ૩૫॥

દયાસિન્ધો દીનબન્ધો યોઽસ્તીશ વરદઃ કરઃ ।
અસ્માકં વરદાનેન સ યુક્તસ્તેઽસ્તુ દક્ષિણઃ ॥ ૩૬॥

દુષ્ટભીતસ્ય મે નિત્યં કરસ્તેઽભયદાયકઃ ।
મહેશાભયદાને સ્યાદુત સવ્યઃ શતક્રતો ॥ ૩૭॥

મહેશ્વરીયપદપદ્મસેવકઃ પુરન્દરાદિપદનિઃસ્પૃહઃ સદા ।
જનોઽસ્તિ યઃ સતતદુર્ગતઃ પ્રભો પૃણક્ષિ વસુના ભવીયસા ॥ ૩૮॥

રક્ષણાય નાસ્તિ મે ત્વાં વિનેશ સાધનમ્ ।
નિશ્ચયેન હે શિવ ત્વામવસ્યુરાચકે ॥ ૩૯॥

રોગૈર્દુઃખૈર્વૈરિગણૈશ્ચ યુક્તાસ્ત્વદ્દાસત્વાચ્છઙ્કર તત્સહસ્વ ।
રમ્યં સ્તોત્રં રોષકરં વચો વા યત્કિઞ્ચાહં ત્વાયુરિદં વદામિ ॥ ૪૦॥

ધ્યાયામ વસ્તુ શઙ્કરં યાચામ ધામ શઙ્કરમ્ ।
કુર્યામ કર્મ શઙ્કરં વોચેમ શન્તમં હૃદે ॥ ૪૧॥

માતા તાતઃ સ્વાદિષ્ઠં ચ પૌષ્ટિકં મન્વાતે વાક્યં બાલસ્ય કુત્સિતમ્ ।
યદ્વત્તદ્વાક્યં મેઽસ્તુ શમ્ભવે સ્વાદોઃ સ્વાદીયો રુદ્રાય બન્ધનમ્ ॥ ૪૨॥

શિવં સુગન્ધિસંયુતં સ્વભક્તપુષ્ટિવર્ધનમ્ ।
સુદીનભક્તપાલકં ત્રિયમ્બકં યજામહે ॥ ૪૩॥

દેવ દેવ ગિરિજાવલ્લભ ત્વં પાહિ પાહિ શિવ શમ્ભો મહેશ ।
યદ્વદામિ સતતં સ્તોત્રવાક્યં તજ્જુષસ્વ કૃધિ મા દેવવન્તમ્ ॥ ૪૪॥

ત્યક્ત્વા સદા નિષ્ફલકાર્યભારં ધૃત્વા સદા શઙ્કરનામસારમ્ ।
હે જીવ જન્માન્તકનાશકારં યક્ષ્યામહે સૌમનસાય રુદ્રમ્ ॥ ૪૫॥

સ્થિત્વા કાશ્યાં નિર્મલગઙ્ગાતોયે સ્નાત્વા સમ્પૂજ્ય ત્રિદશેશ્વરં વૈ ।
તસ્ય સ્તોત્રં પાપહરૈસ્તુ દેવ ભદ્રં કર્ણેભિઃ શ◌ૃણુયામ દેવાઃ ॥ ૪૬॥

વારાણસ્યાં શઙ્કરં સુરાઢ્યં સપૂજયેશં વસુભિઃ સુકાન્તૈઃ ।
અગ્રે નૃત્યન્તઃ શિવસ્ય રૂપં ભદ્ર પશ્યેમાક્ષભિર્યજત્રાઃ ॥ ૪૭॥

ઇચ્છામસ્ત્વાં પૂજયિતું વયં વિશ્વેશ સન્તતમ્ ।
પ્રયચ્છ નો ધનં શ્રેષ્ઠં યશસં વીરવત્તમમ્ ॥ ૪૮॥

કાશ્યામુષિત્વા ગઙ્ગાયાં સ્નાત્વા સમ્પૂજ્ય શઙ્કરમ્ ।
ધ્યાત્વા તચ્ચરણૌ નિત્યમલક્ષ્મીર્નાશયામ્યહમ્ ॥ ૪૯॥

અસત્પદં સ્વહર્ષદં ન ચાન્યહર્ષદાયકં
સદા મુદા પ્રસૂર્યથા શ‍ૃણોતિ ભાષિતં શિશોઃ ।
શિવાપગાશિવાબલાશિવાલયાસમન્વિતસ્તથા
શિવેશ નઃ સુરૈર્ગિરામુપશ્રુતિં ચર ॥ ૫૦॥

સગરસ્યાત્મજા ગઙ્ગે મતાઃ સન્તારિતાસ્ત્વયા ।
અગરસ્યાત્મજા તસ્માત્ કિં ન તારયસિ ધ્રુવમ્ ॥ ૫૧॥

પ્રાયિકોઽયં પ્રવાદોઽસ્તુ તરન્તિ તવ સન્નિધૌ ।
તારકં નામ તે ગઙ્ગે સન્નિધેઃ કિં પ્રયોજનમ્ ॥ ૫૨॥

મીનૈરાયતલોચને વસુમુખીવાબ્જેન રોમાવલીયુક્તો
રાજવતીવ પદ્મમુકુલૈઃ શૈવાલવલ્લ્યા યુતૈઃ ।
ઉદ્ભાસ્વજ્જઘનેન વાલપુલિનૈરુદ્યદ્ભુજેવોર્મિભિ-
ર્ગર્તેનોજ્જ્વલનાભિકેવ વિલસસ્યેષા પરં જાહ્નવી ॥ ૫૩॥

શ‍ૃઙ્ગારિતાં જલચરૈઃ શિવસુન્દરાઙ્ગ-
    સઙ્ગાં સદાપહૃતવિશ્વધવાન્તરઙ્ગામ્ ।
ભૃઙ્ગાકુલામ્બુજગલન્મકરન્દતુન્દ-
    ભૃઙ્ગાવલીવિલસિતાં કલયેઽથ ગઙ્ગામ્ ॥ ૫૪॥

વિશ્વેશોઽસિ ધનાધિપપ્રિયસખા કિં ચાન્નપૂર્ણાપતિ-
ર્જામાતા ધરણીભૃતો નિરુપમાષ્ટૈશ્વર્યયુક્તઃ સ્વયમ્ ।
ચત્વાર્યેવ તથાપિ દાસ્યસિ ફલાન્યાત્માશ્રયાન્તે ચિરં
તેભ્યોઽતો બત યુજ્યતે પશુપતે લબ્ધાવતારસ્તવ ॥ ૫૫॥

દોષાકરં વહસિ મૂર્ધ્નિ કલઙ્કવન્તં
    કણ્ઠે દ્વિજિહ્વમતિવક્રગતિં સુઘોરમ્ ।
પાપીત્યયં મયિ કુતો ન કૃપાં કરોષિ
    યુક્તૈવ તે વિષમદૃષ્ટિરતો મહેશ ॥ ૫૬॥

અસ્તિ ત્રિનેત્રમુડુરાજકલા મમેતિ
    ગર્વાયતે હ્યતિતરાં બત વિશ્વનાથ ।
ત્વદ્વાસિનો જનનકાશિશશાઙ્કચૂડા-

ભાલેક્ષણાશ્ચ ન ભવન્તિ જનાઃ કિયન્તઃ ॥ ૫૭॥

કામં સન્ત્યજ નશ્વરેઽત્ર વિષયે વામં પદં મા વિશ
ક્ષેમં ચાત્મન આચર ત્વમદયં કામં સ્મરસ્વાન્તકમ્ ।
ભીમં દણ્ડધરસ્ય યોગિહૃદયારામં શિરપ્રોલ્લસત્સોમં
ભાવય વિશ્વનાથમનિશં સોમં સખે માનસે ॥ ૫૮॥

સમ્પૂજ્ય ત્રિદશવરં સદાશિવં યો વિશ્વેશસ્તુતિલહરીં સદા પઠેદ્વૈ ।
કૈલાસે શિવપદપઙ્કજરાજહંસ આકલ્પં સ હિ નિવસેચ્છિવસ્વરૂપઃ ॥ ૫૯॥

અનેન પ્રીયતાં દેવો ભગવાન્ કાશિકાપતિઃ ।
શ્રીવિશ્વનાથઃ પૂર્વેષામસ્માકં કુલદૈવતમ્ ॥ ૬૦॥

ઇયં વિશ્વેશલહરી રચિતા ખણ્ડયજ્વના ।
વિશ્વેશતુષ્ટિદા નિત્યં વસતાં હૃદયે સતામ્ ॥ ૬૧॥

નામ્ના ગુણૈશ્ચાપિ શિવૈવ માતા તાતઃ શિવસ્ત્ર્યમ્બકયજ્વનામા ।
મલ્લારિદેવઃ કુલદૈવતં મે શ્રીકૌશિકસ્યાસ્તિ કુલે ચ જન્મ ॥ ૬૨॥

ઇતિ શ્રીગણેશદીક્ષિતાત્મજત્ર્યમ્બકદીક્ષિતતનૂજખણ્ડરાજદીક્ષિતવિરચિતા
વિશ્વેશલહરી સમ્પૂર્ણા ॥

Proofread by PSA Easwaran

*vishveshalaharI*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*